CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैदिकम्

(१)

ऐतरेयब्राह्मणम्

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्

[अन्तिमाध्यायद्वयात्मको भागः]

Funding by IKS-MoE

डॉ० वामदेवमिश्रः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैदिकम्



(१)

ऐतरेयब्राह्मणम्

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्

[अन्तिमाध्यायद्वयात्मको भागः]



डॉ० वामदेवमिश्रः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशिका
गीता देवी
गीतासंस्कृतप्रकाशन
के० २०/१४० राजमन्दिर
वाराणसी
२२१००१

मूल्य—५.००



मुद्रकः—
आचार्य मुद्रणालय ए १/१२
गायघाट, वाराणसी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रास्ताविकम्

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः। अत्र लौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते। अनुभूयमानस्य स्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वमौषधादेरनिष्टपरिहारहेतुत्वं च प्रत्यक्षसिद्धम्। स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम्। एवंविधस्य वेदस्य भागद्वयं मन्त्रब्राह्मणयोर्वेदनामधेयमित्यापस्तम्बसम्मतं मतम्। अनयोरन्यतरं ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः।

तत्र चतुर्ष्वपि वेदेषु प्रतिवेदशाखासम्बद्धेषु स्वतन्त्रास्तित्वसम्पन्नेषु ब्राह्मणग्रन्थेष्वन्यतममवान्तरविभागरूपेण पञ्चाशीत्यधिकशतद्वयकण्डिकासहितमष्टपञ्चिकात्मकञ्चत्वारिंदध्यायपरिमितमृग्वेदीयमैतरेयब्राह्मणम्। यत्र प्रथमद्वितीयपञ्चिकयोरग्निष्टोमस्य, तृतीयचतुर्थपञ्चिकयोः प्रातर्माध्यन्दिनसायंसवनीयशस्त्रसहितोक्थ्यातिरात्रषोडशीनाम्, पञ्चम्यां द्वादशाहस्य, षष्ठ्यां बहुदिनसाध्ययागहौत्रस्य, सप्तम्यां राजसूयस्य, अष्टम्यामैन्द्रमहाभिषेकस्यैतिह्यसहितचक्रवर्तीमहाराजाभिषेकस्य पौरोहित्यब्रह्मपरिमरविधेश्च महत्त्वं प्रतिपादितमस्ति।

कर्मकाण्डेतिहासविषयाद्यनेकदृष्टिसिद्धमहत्त्वसम्पन्नयोः उपान्तिमान्तिमाध्याययोः सायणभाष्यसहितयोः स्वातन्त्र्यमवेक्ष्य सर्वसुलभाय सम्पादनं विधीयत इति—

काशीविद्यापीठम्
बसन्तपंचमी
२०४४

—वामदेवमिश्रः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐतरेयब्राह्मणम्

अथैकोनचत्वारिंशोऽध्यायः

पुरुषार्थाभिषेकार्थमादावैन्द्राभिषेचनम् ।
उक्तमत्र पुमर्थोऽयमभिषेक उदीर्यते ॥

तमभिषेकं विधत्ते—

स य इच्छेदेवंवित्क्षत्रियमयं सर्वा जितीर्जयेतायं सर्वाल्लोँकान्विन्देतायं सर्वेषां राज्ञां श्रेष्ठ्यमतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सावायुष आऽन्तादा परार्धात्पृथिव्यै समुद्रपर्यन्ताया एकराळिति तमेतैनैन्द्रेण महाभिषेकेण क्षत्रियं शापयित्वाऽभिषिञ्चेत्, इति ।

एवंविदिन्द्रसंबन्धिमहाभिषेकविद्य आचार्यः क्षत्रियं प्रति सर्वजयादिफलमिच्छेत्स आचार्यः क्षत्रियमेतं शापयित्वा शपथं कारयित्वैतेन पूर्वोक्तेनेन्द्रसंबन्धिना महाभिषेकविधानेन तं क्षत्रियमभिषिञ्चेत् । कीदृशो फलेच्छेति साऽभिधीयते । अयं क्षत्रियो जेतव्याः सर्वा युद्धभूमीर्जयेत् । तथा सर्वाँल्लोकान्देशविशेषाल्लँभेत । सर्वेषां राज्ञां मध्ये श्रैष्ठ्याद्याधिपत्यान्तगुणयुक्तो भवेत् । समन्तपर्यायी देशतः कालतः सर्वव्यापी स्यात् । आऽन्तात्समुद्रतीरपर्यन्तं सार्वभौमत्वं देशव्याप्तिरापरार्धात्परार्धशब्दाभिधेयकालसंख्यापर्यन्तं सार्वायुषत्वं कालव्याप्तिः । एवंविधो भूत्वा समुद्रपर्यन्ताया पृथिव्या एक एव राजाऽस्त्वित्यनयेच्छयाऽऽचार्यो महाभिषेकेण तमभिषिञ्चेत्।

शापयित्वेति यदुक्तं तमेव शपथप्रकारं दर्शयति—

यां च रात्रीमजायेथा यां च प्रेतासि तदुभयमन्तरेणेष्टापूर्ते ते लोकं सुकृतमायुः प्रजां पशूंस्त्वयि सन्दधे मयि मे द्रुह्येरिति, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation,Chandigarh

अभिषिच्यमान हे क्षत्रिय यद्याचार्याय मे द्रुह्येर्द्रोहं कुर्यास्तदानीं त्वं यां रात्रिमजायेथा यस्यां रात्रावुदपद्यथाऽसि यां च रात्रिं प्रतासि यस्यां रात्रौ मरिष्यसि तदुभयमन्तरेणोत्पत्तिमरणदिनयोर्द्वयोर्मध्ये ते तवेष्टापूर्तं श्रौतस्मार्तकर्मद्वयं तथा पुण्यलोकं तद्धेतुभूतमन्यदपि सुकृतं दीर्घमायुः प्रजां पुत्रादिकां वृञ्जीयं त्वत्तो वर्जयेयमित्येतदाचार्यस्य वाक्यम् । तदेतदङ्गीकारयित्वा पश्चादभिषिञ्चेत् ।

आचार्यः क्षत्रियायैं यादृशीं फलपरम्परां कामयित्वा शपथं कारयति क्षत्रियोऽपि तादृशीं फलपरम्परां कामयमानः शपथ कुर्यात् । तदेतत्क्षत्रियवाक्यं दर्शयति—

स य इच्छेदेवंवित्क्षत्रियोऽहं सर्वा जितीर्जयेयमहं सर्वाल्लोकान्विन्देयमहं सर्वेषां राज्ञां श्रेष्ठ्यमतिष्ठां परमतां गच्छेयं साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमहं समन्तपर्यायी स्यां सार्वभौमः सार्वायुष आऽन्तादा परार्धात्पृथिव्यै समुद्रपर्यन्ताया एकराळिति स न विचिकित्सेत्स ब्रूयात्सह श्रद्धया यां च रात्रीमजायेऽहं यां च प्रेताऽस्मि तदुभयमन्तरेणेष्टापूर्तं मे लोकं सुकृतमायुः प्रजां वृञ्जीथा यदि ते द्रुह्येयमिति ॥ १५ ॥ इति ।

यः क्षत्रिय एवंविन्महाभिषेकमाहात्म्याभिज्ञः सर्वंजयादिकं समुद्रपर्यन्तं पृथिव्यामेकराजत्वपर्यन्तं फलजातमिच्छेत् । पूर्वत्राऽऽचार्यवाक्यत्वाज्जयेत विन्देतेत्यादिप्रथमपुरुषप्रयोगः । अत्र तु क्षत्रियवाक्यत्वाज्जयेयमित्याद्युत्तमपुरुषप्रयोगः । स क्षत्रियः फलकामी न विचिकित्सेत् । आचार्योक्तेऽर्थे संशयं न कुर्यात् । स क्षत्रिय आचार्यस्याभीष्टं शपथमेवं कुर्यात् । हे आचार्याहं यदि ते द्रुह्येयं तदानीं त्वं मम जन्ममरणमध्यवर्तीष्टापूर्तादिकं सर्वं वृञ्जीथा नाशयेरिति श्रद्धया सहितं शपथं ब्रूयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्य एकोनचत्वारिंशाध्याये प्रथमः खण्डः ॥१॥(१५) [१७३] ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संभारान्विधत्ते—

अथ ततो ब्रूयाच्चतुष्टयानि वानस्पत्यानि संभरत नैयग्रोधान्यौदुम्बराण्याश्वत्थानि प्लाक्षाणीति, इति ।

अथ क्षत्रियशपथानन्तरं यत आचार्येणाभिषेकः कर्तव्यस्ततः कारणादाचार्यः परिचारकान्ब्रूयात् । वनस्पतिसंबन्धीनि न्यग्रोधादीनि फलानि चतुर्विधानि हे परिचारकाः संपादयतेति ।

तत्र वृक्षचतुष्टयं क्रमेण प्रशंसति—

क्षत्त्रं वा एतद्वनस्पतीनां यन्न्यग्रोधो यन्नैयग्रोधानि संभरन्ति क्षत्त्रमेवास्मिंस्तद्दधाति भौज्यं वा एतद्वनस्पतीनां यदुदुम्बरो यदौदुम्बराणि संभरन्ति भौज्यमेवास्मिंस्तद्दधाति साम्राज्यं वा एतद्वनस्पतीनां यदश्वत्थो यदाश्वत्थानि संभरन्ति साम्राज्यमेवास्मिंस्तद्दधाति स्वाराज्यं च ह वा एतद्वैराज्यं च वनस्पतीनां यत्प्लक्षो यत्प्लाक्षाणि संभरन्ति स्वराज्यवैराज्ये एवास्मिंस्तद्दधाति, इति ।

न्यग्रोधस्य वनस्पतीनां मध्ये राजवद्व्याप्त्याधिक्यात्क्षत्त्रत्वम् । उदुम्बरादीनां भौज्यादिसाधनत्वात्तद्रूपत्वम् । अतश्चतुर्विधफलसंपादनेन यजमाने क्षात्त्रभौज्यादिफलानि संपादयति ।

संभारान्तराणि विधत्ते—

अथ ततो ब्रूयाच्चतुष्टयान्यौषधानि संभरत तोक्मकृतानि व्रीहीणां महाव्रीहीणां प्रियंगूनां यवानामिति, इति ।

अथ नेयग्रोधादिफलसंपादनानन्तरं यतो व्रीह्याद्यङ्कुरसंपादनमपेक्षितं तत आचार्य एवं ब्रूयात् । हे परिचारकास्तोक्मकृतान्यङ्कुरनिमित्तान्योषधिद्रव्याणि चतुर्विधानि संपादयत । सूक्ष्मबीजरूपा व्रीहयः । प्रौढबीजरूपा महाव्रीहयः प्रियंगवो यवाश्च प्रसिद्धाः ।

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Jammu. Digitized by eGangotri

चतुर्विधमोषधिद्रव्यं प्रशंसति—

क्षत्त्रं वा एतदोषधीनां यद्व्रीहयो यद्व्रीहीणां तोक्म संभरन्ति क्षत्त्रमेवास्मिंस्तद्दधाति साम्राज्यं वा एतदोषधीनां यन्महाव्रीहयो यन्महाव्रीहीणां तोक्म संभरन्ति साम्राज्यमेवास्मिंस्तद्दधाति भौज्यं वा एतदोषधीनां यत्प्रियंगवो यत्प्रियंगूनां तोक्म संभरन्ति भौज्यमेवास्मिंस्तद्दधाति सैनान्यं वा एतदोषधीनां यद्यवा यद्यवानां तोक्म संभरन्ति सैनान्यमेवास्मिंस्तद्दधाति ॥ १६ ॥ इति ।

ओषधीनां मध्ये व्रीहीणां बलहेतुत्वात्क्षत्त्रत्वम् । महाव्रीह्यादीनामप्यनुष्ठानद्वारा साम्राज्यहेतुत्वात्तद्रूपत्वम् । अतो व्रीह्यादितोक्मनामङ्कुराणां संपादनेन यजमाने क्षत्त्रसाम्राज्यादिकं सर्वं संपादयति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्य एकोनचत्वारिंशाध्याये द्वितीयः खण्डः ॥२॥ (१६) [१७४] ।

———

आसन्द्यादिसंभारान्विधत्ते—

अथास्मा औदुम्बरीमासन्दीं संभरन्ति तस्या उक्तं ब्राह्मणमौदुम्बरश्चमसो वा पात्री वोदुम्बरशाखा तानेतान्संभारान्संभृत्यौदुम्बर्यां पात्र्यां वा चमसे वा समावपेयुस्तेषु समोप्तेषु दधि मधु सर्पिरातपवर्ष्या आपोऽभ्यानीय प्रतिष्ठाप्यैतामासन्दीमभिमन्त्रयेत, इति ।

अथ वानस्पत्यौषधिसंभारानन्तरमस्मै क्षत्त्रियायौदुम्बरीमासन्दीं संपादयेयुः । तस्याश्चाऽऽसन्द्या विधायकं ब्राह्मणं प्रादेशमात्राः पादा इत्यादिना पूर्वमेवोक्तम् । चतुष्कोणो दण्डयुक्तः पात्रविशेषश्चमसः । आकारनियमरहिता पात्री । तयोरन्यत्तरदौदुम्बरं संपादयेत् । यद्वा । पात्री मृन्मयी शाखा चौदुम्बरी संपादनीया । ततः पात्रीचमसयोरन्यतरस्मिन्वानस्पत्यौषधिसंभारान्समावपेयुः । समोप्तेषु तेषु संभारेषु दध्यादीनां सेचनं कृत्वा चमसं भूमौ प्रतिष्ठाप्यैतामासन्दीं वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं मन्त्रं दर्शयति—

बृहच्च ते रथंतरं च पूर्वौ पादौ भवता वैरूपं च वैराजं चापरौ शाक्वररैवते शीर्षण्ये नौधसं च कालेयं चानूच्ये ऋचः प्राचीनातानाः सामानि तिरश्चीनवाया यजूंष्यतीकाशा यश आस्तरणं श्रीरुपबर्हणं सविता च ते बृहस्पतिश्च पूर्वौ पादौ धारयतां वायुश्च पूषा चापरौ मित्रावरुणौ शीर्षण्ये अश्विनावनूच्ये इति, इति ।

इन्द्रासन्दीप्रतिपादकवाक्यवदयं मन्त्रो व्याख्येयः ।

अभिमन्त्रणादूर्ध्वमाचार्यकर्तव्यं दर्शयति—

अथैनमेतामासन्दीमारोहयेत्, इति ।

अथाभिषिक्तमेनं क्षत्रियमेतस्यामासन्द्यामारूढं कुर्यात् ।

तत्र मन्त्रं दर्शयति—

वसवस्त्वा गायत्रेण च्छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्नाऽऽरोहन्तु तानन्वारोह साम्राज्याय रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा पञ्चदशेन स्तोमेन बृहता साम्नाऽऽरोहन्तु तानन्वारोह भौज्यायाऽऽदित्यास्त्वा जागतेन च्छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्नाऽऽरोहन्तु तानन्वारोह स्वाराज्याय विश्वे त्वा देवा आनुष्टुभेन च्छन्दसैकविंशेन स्तोमेन वैराजेन साम्नाऽऽरोहन्तु तानन्वारोह वैराज्याय मरुतश्च त्वाऽङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्नाऽऽरोहन्तु तानन्वारोह पारमेष्ठ्याय साध्याश्च त्वाऽऽप्त्याश्च देवाः पाङ्क्तेन च्छन्दसा त्रिणवेन स्तोमेन शाक्करेण साम्नाऽऽरोहन्तु तानन्वारोह राज्याय माहाराज्यायाऽऽधिपत्याय स्वावश्यायाऽऽतिष्ठायाऽऽरोहेत्येतामासन्दीमारोहयेत्, इति ।

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

इन्द्रारोहणमन्त्रवद्व्याख्येयम्। तत्राऽऽरोहणकर्तुरप्रयोज्यत्वादारोहामीत्युत्तमपुरुषः। अत्र त्वाचार्यप्रयोज्यत्वादारोहेति मध्यमपुरुषः। तत्रत्ययोः पञ्चमषष्ठमन्त्रयोरत्र क्रमविपर्यासोऽध्ययनसंप्रदायप्रातः। अनेन मन्त्रेणाऽऽचार्यं आसन्द्यां क्षत्त्रियमारोहयेत्।

आरोहणादूर्ध्वमभ्युत्क्रोशनं विधत्ते—

तमेतस्यामासन्द्यामासीनं राजकर्तारो ब्रूयुर्न वा अनभ्युत्कुष्टः क्षत्त्रियो वीर्यं कर्तुमर्हत्यभ्येनमुत्क्रोशामेति तथेति तं राजकर्तारोऽभ्युत्क्रोशन्तीमं जना अभ्युत्क्रोशत सम्राजं साम्राज्यं भोजं भोजपितरं स्वराजं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरं क्षत्त्रमजनि क्षत्त्रियोऽजनि विश्वस्य भूतस्याधिपतिरजनि विशामत्ताऽजन्यमित्राणां हन्ताऽजनि ब्राह्मणानां गोप्ताऽजनि धर्मस्य गोप्ताऽजनीति, इति।

राज्ञः कर्तारो राजकर्तारः पितृभ्रात्रादयः। इन्द्रविषयाभ्युत्क्रोशनवाक्यवदिदं वाक्यं व्याख्येयम्।

आचार्यस्य क्षत्त्रियाभिमन्त्रणं विधत्ते—

तमभ्युत्कुष्टमेवंविदमिषेक्ष्यन्नेतयर्चाऽभिमन्त्रयेत ॥१७॥ इति।

पूर्ववद्व्याख्येयम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्य एकोनचत्वारिंशाध्याये तृतीयः खण्डः ॥३॥ (१७) [१७५]।

एतयर्चेत्युक्तं मन्त्रं दर्शयति—

निषसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाऽऽधिपत्याय स्वावश्यायाऽऽतिष्ठाय सुक्रतुरिति, इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्ववद्व्याख्येयम् ।

अभिमन्त्रणादूर्ध्वमभिषेकप्रकारं दर्शयति—

तमेतस्यामासन्द्यामासीनमेवंवित्पुरस्तात्तिष्ठन्प्रत्यङ्मुख औदुम्बर्याऽऽर्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चतीमा आपः शिवतमा इत्येतेन तृचेन देवस्य त्वेति च यजुषा भूर्भुवः स्वरित्येताभिश्च व्याहृतिभिः ॥ १८ ॥ इति ।

इन्द्राभिषेकवाक्यवद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्य एकोनचत्वारिंशाध्याये चतुर्थः खण्डः ॥४॥ (१८) [१७६] ।

———

अभिषेकादूर्ध्वमभिमन्त्रणमाह—

प्राच्यां त्वा दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय दक्षिणस्यां त्वा दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्भौज्याय प्रतीच्यां त्वा दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्यायोदीच्यां त्वा दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्यायोर्ध्वां त्वा दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्यायास्यां त्वा ध्रुवायां मनुष्यायां प्रतिष्ठायां दिशि साध्या-

Funding by IKS-MoE

CC-0. Vasishtha Tripathi Collection. Digital Preservation Foundation, Chandigarh

श्राऽऽप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभिषिञ्चन्त्वेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहाराज्यायाऽऽधिपत्याय स्वावश्यायाऽऽतिष्ठायेति स परमेष्ठी प्राजापत्यो भवति, इति ।

उक्तेन मन्त्रेणाभिमन्त्रितः क्षत्त्रियः परमेष्ठिपदस्य योग्यो भूत्वा प्रजापतेः संबन्धी भवतीति ।

महाभिषेकमुपसंहरति—

स एतेनैन्द्रेण महाभिषेकेणाभिषिक्तः क्षत्त्रियः सर्वा जितीर्जयति सर्वाल्लोंकान्विन्दति सर्वेषां राज्ञां श्रैष्ठ्यमतिष्ठां परमतां गच्छति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यं जित्वाऽस्मिल्लोंके स्वयंभूः स्वराळमृतोऽमुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः संभवति यमेतेनैन्द्रेण महाभिषेकेण क्षत्त्रियं शापयित्वाऽभिषिञ्चति ॥१९॥ इति ।

यं क्षत्त्रियमाचार्यः स्वद्रोहराहित्याय शपथं कारयित्वेन्द्रसंबन्धिना महाभिषेकेणाभिषिञ्चति सोऽभिषिक्तः क्षत्त्रिय इन्द्रवत्सर्वं जयादिफलं प्राप्नोति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्य एकोनचत्वारिंशाध्याये पञ्चमः खण्डः ॥५॥ (१९) [१७७] ।

— — —

अभिषेकसाधनानि दध्यादिद्रव्याणि प्रशंसति—

इन्द्रियं वा एतदस्मिल्लोके यद्दधि यद्घनाऽभिषिञ्चतीन्द्रिय मेवास्मिंस्तद्दधाति रसो वा एष ओषधिवनस्पतिषु यन्मधु यन्मध्वाऽभिषिञ्चति रसमेवास्मिंस्तद्दधाति तेजो वा एतत्पशूनां यद्घृतं यद्घृतेनाभिषिञ्चति तेज एवास्मिंतद्दधात्यमृतं वा

Funding by IKS-MoE

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Agamnigam Digital Preservation Foundation, Chandigarh.

एतदस्मिल्लोके यदापो यदद्भिरभिषिञ्चत्यमृतत्वमेवास्तिद्दधाति, इति ।

दध्न इन्द्रियपाटवहेतुत्वादिन्द्रियत्वम् । मधुनः पुष्पजन्यत्वेनौषधिवनस्पतिरसत्वम् । घृतस्य स्निग्धभास्वरत्वेन पशुतेजस्त्वम् । अपां चाऽऽप्यायनहेतुत्वादमृतत्वम् । एतैर्द्रव्यैरभिषिक्ते सति यजमान इन्द्रियादिकं संपादयति ।

आचार्याय दक्षिणादानं विधत्ते—

सोऽभिषिक्तोऽभिषेक्त्रे ब्राह्मणाय हिरण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं चतुष्पाद्यादथाप्याहुरसंख्यातमेवापरिमितं दद्यादपरिमितो वै क्षत्रियोऽपरिमितस्यावरुद्ध्या इति, इति ।

हिरण्यस्यैव संख्या सहस्रमिति । सहस्रनिष्कपरिमितमित्यर्थः । चतुष्पाच्छब्देन गवादिकमभिधीयते । पूर्वोक्तसहस्रपक्षमपेक्ष्याधिकाभिप्रायेणासंख्यातमिति पक्षान्तरमुक्तम् । तस्यैव व्याख्यानमपरिमितमिति । इयदेवेति संख्यानियमो नास्ति । किंतु स्वशक्त्यनुसारेण प्रभूतमेव दद्यात् । क्षत्रियो हि देशाधिपतित्वेनापरिमितो बहुधनयुक्तोऽतोऽपरिमितस्य प्रभूतस्य फलस्य सिद्ध्यर्थमित्यभिप्रायेण पक्षान्तरम् ।

दक्षिणायां दत्तायामाचार्यकर्तव्यं दर्शयति—

अथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुत इति, इति ।

अथ दक्षिणास्वीकारादनन्तरमस्मा अस्य क्षत्रियस्य हस्ते सुरया पूर्णं कांस्यपात्रं स्वादिष्ठयेति मन्त्रेण स्थापयेत् । स च मन्त्रः क्रत्वङ्गाभिषेके व्याख्यातः ।

क्षत्रियकर्तव्यं दर्शयति—

तां पिबेद्यदत्र शिष्टं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि । अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदमिति, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तां कांस्यपात्रस्थां सुरां क्षत्रियो यदत्रेति मन्त्रद्वयेन पिबेत्। अत्र कांस्यपात्रे रसिनो रसयुक्तस्य सुतस्याभिषुतस्य व्रीह्याद्यङ्कुरजन्यस्य पेयद्रव्यस्य यच्छिष्टं योऽवस्थितो भागः। यच्च द्रव्यं शचीभिः कर्मविशेषैः संस्कृतमिन्द्रोऽपिबत्। शचीशब्दः कर्मनाम। इहास्मिन्नभिषेककर्मणि सोमं राजानं सोमसदृशमस्य पेयद्रव्यस्य तदिदं स्वरूपं शिवेन शान्तेन भक्तियुक्तेन मनसा भक्षयामि। सोऽयमेको मन्त्रः। हे वृषभ श्रेष्ठेन्द्र त्वाऽभि त्वामभिलक्ष्य सुतेऽस्मिन्द्रव्येऽभिषुते सति पीतये तव पानार्थं सुतमभिषुतं द्रव्यं सृजामि त्वदृस्ते ददामि। तृम्प तेन द्रव्येण तृप्तो भव। मदं हर्षं व्यश्नुहि विशेषेण प्राप्नुहि। अयं द्वितीयो मन्त्रः।

तदिदं पानं प्रशंसति—

यो ह वाव सोमपीथः सुरायां प्रविष्टः सहैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्त्रियस्य भक्षितो भवति न सुरा, इति।

यो ह वाव यः खलु सोमपीथः सोमस्य पानविशेषः सुरायां सुराद्रव्ये प्रविष्टोऽस्ति। एतेन सोमपानविशेषेण सहैव पूर्वोक्तेन्द्राभिषेकविधानेनाभिषिक्तस्य क्षत्त्रियस्य द्रव्यविशेषो भक्षितो भवति। नतु सुरा भक्षिता भवति। सोऽयं मन्त्रद्वयस्य महिमा।

पानादूर्ध्वमभिमन्त्रणं विधत्ते—

तां पीत्वाऽभिमन्त्रयेतापाम सोम शं नो भवेति, इति।

अपाम सोममित्यृगेका। शं नो भवेति द्वितीया। ताभ्यामभिमन्त्रयेत।

इदानीं दृष्टान्तेन पानं प्रशंसति—

तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिवमुपस्पृशत्यावित्तस एवं हैवैतेनैन्द्रेण महाभिषेकेणाभिषिक्तस्य क्षत्त्रियस्य सुरा वा सोमो वाऽन्यद्वाऽन्नाद्यं सुखं शिवमुपस्पृशत्यावित्तसः॥ २०॥ इति।

तत्तत्र पानेऽदो लौकिकं निदर्शनमुच्यते। यथैव प्रियः पुत्रः शिवं सुखं यथा भवति तथा पितरमुपस्पृशति। प्रिया वा जाया च पतिं यथा स्पृशति। शिवं शान्तं शास्त्रनिषिद्धमार्गेण [illegible] हेतुत्वादुग्रम्। विहितमार्गेण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तु तदभावाच्छान्तम्। सुखस्पर्शस्यावधिराविस्रस इत्यनेनोच्यते। आविस्रस आविस्रंसनाद्देहपातपर्यन्तमित्यर्थः। यथा स्पर्शद्वयं दृष्टसुखहेतुरेवं हैवानेनैव प्रकारेण पूर्वोक्तैन्द्रमहाभिषेकविधिनाऽभिषिक्तस्य क्षत्त्रियस्य सुरा वा सोमो वाऽन्यान्यत्तद्द्रव्याणि देहपातपर्यन्तं शान्तसुखस्पर्शप्रदानि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्य एकोनचत्वारिंशाध्याये षष्ठः खण्डः ॥६॥ (२०) [१७८]।

———

उक्तं महाभिषेकं चिरंतनशिष्टाचारोदाहरणेन प्रशंसति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षितमभिषिषेच तस्माद्धु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति।

कवषस्य पुत्रस्तुरनामको महर्षिः परिक्षितपुत्रं जनमेजयमुक्तविधानेनाभिषिषेच। तस्मादेव कारणाज्जनमेजयः सर्वतः सर्वासु दिक्षु पृथिवीं समन्तमन्तेन समुद्रतीरेण संयुक्तं यथा भवति तथा जयन्विजयं प्राप्नुवन्परीयाय परितश्चचार अभिषेकमाहात्म्येनैव दिग्विजयं कृतवानित्यर्थः। अभिषेकप्रसादादेव मेध्ययागयोग्येनाश्वेन चेज इष्टवान्। अश्वमेधं कृतवानित्यर्थः।

अस्मिन्नर्थे कांचिद्गाथामुदाहरति—

तदेषाऽभि यज्ञगाथा गीयते, इति।

तत्तस्मिञ्जनमेजयवृत्तान्त एषा वक्ष्यमाणा यज्ञविषया गीतिर्वैदिकैरभितो गीयते।

तां गाथां दर्शयति—

आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम्।
अश्वं बबन्ध सारंगं देवेभ्यो जनमेजय इति, ॥ इति।

आसन्दीवानिति देशविशेषस्य नामधेयम्। तस्मिन्देशे जनमेजयो देवेभ्यो देवार्थं यागयोग्यमश्वं बबन्ध। कीदृशमश्वम्। धान्यादं धान्यमेवात्ति। रुक्मिणम्। रुक्मशब्देन ललाटगतं शेवलमेऽत्र नोपलक्ष्यते। तद्युक्तम्।

Funding by IKS-MoE

CC-0. Agamshastri Collection, Haridwar. Digitized by eGangotri

हरितवर्णा स्रग्यस्यासौ हरितस्रक्। पुष्पमालेव वर्णो देहं व्याप्य वर्तत इत्यर्थः। सारं कर्मसु श्रेष्ठं यागं गच्छतीति सारंगः। इत्यनया गाथया जनमेजयस्याभिषेकमहिमोदाहृतः।

जनमेजयवच्छार्यातनामकं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानवमभिषिषेच तस्माद्धु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे देवानां हापि सत्रे गृहपतिरास, इति।

भृगोः पुत्रश्च्यवननामको महर्षिर्मनुवंशोत्पन्नं शार्यातनामकं राजानमभिषिषेच। तस्मात्फलं पूर्ववत्। किंच देवानां संबन्धिनि सत्रेऽपि शार्यातो गृहपतिरभूत्।

शतानीकनामकं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजितमभिषिषेच तस्माद्धु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति।

सोमशुष्मनामकः कश्चिन्महर्षिः। स च वाजरत्नस्य पौत्रः। तथाविधो मुनिः सत्राजितः पुत्रं शतानीकनामकं क्षत्रियमभिषिषेच। शेषं पूर्ववत्।

आम्बाष्ठ्यनामानं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बाष्ठ्यमभिषिषिचतुस्तस्माद्वाम्बाष्ठ्यः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति।

युधांश्रौष्टिनामकमुग्रसेनस्य पुत्रं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टिमौग्रसैन्यमभिषिषिचतुस्तस्माद्धु युधांश्रौष्टिरौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भुवनाख्यस्य पुत्रं विश्वकर्मनामकं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवनमभिषिषेच तस्माद्धु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति ।

भौवनाभिषेकमाहात्म्यं प्रशंसितुं पुरातनमहर्षिप्रोक्तमुदाहरणं दर्शयति—

भूमिर्ह जगावित्युदाहरन्ति, इति ।

भूमिर्देवता जगौ भौवनं प्रति किंचिद्वाक्यं गाथारूपमुक्तवतीत्येवं पूर्वे महर्षय उदाहरन्ति ।

तां गाथां दर्शयति—

न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्मन्भौवन मां दिदासिथ । निमङ्क्ष्येऽहं सलिलस्य मध्ये मोघस्त एष कश्यपायाऽऽस संगर इति, ।

भुवनाख्यस्य पुत्र हे विश्वकर्मन्कश्चिदपि मां भूमिं दातुं नार्हति । अत एव मीमांसका विचार्य सर्वस्वदाने महाभूमिदानं निवारितवन्तः । एवं सति त्वं मां भूमिं दिदासिथ कश्यपाय त्वदीयाचार्याय दातुमिच्छसि । अहं तु सलिलस्य समुद्रस्य मध्ये निमङ्क्ष्ये निमज्जनं करिष्ये । तथा सति ते कश्यपाय त्वदीयाचार्यस्य कश्यपस्यैष संगरो भूमिप्रतिग्रहविषयो मोघ आस व्यर्थ एव बभूवेति । ईदृशमपि महाभूमिमज्जनं महाभिषेकमहिम्ना निवारितमिति तात्पर्यार्थः ।

सुदा इत्येतन्नामकं पिजवनस्य पुत्रं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवनमभिषिषेच तस्माद्धु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे, इति ।

अविक्षिन्नामकस्य पुत्रं मरुत्तनामानं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त आङ्गिरसो मरुत्त-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माविक्षितमभिषिषेच तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मध्येनेजे, इति ।

संवर्तनामको महर्षिरङ्गिरसः पुत्रः ।

तेन कृतं मरुत्ताभिषेकं प्रशंसितुं श्लोकमुदाहरति--

तदप्येष श्लोकोऽभिगीतः, इति ।

तस्मिन्नपि मरुत्ताभिषेकमाहात्म्य एष वक्ष्यमाणः श्लोकः पादबद्धो मन्त्रोऽभिगीतोऽभितः सर्वैः पठितः ।

तं श्लोकं दर्शयति--

मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे ।
आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति॥ २१ ॥

मरुत्तनाम्नो राज्ञो गृहे मरुत्संज्ञका देवा भाजनकाले परिवेषणकर्तारो भूत्वाऽवसन् । तथैवाऽविक्षितस्याविक्षित्पुत्रस्य कामप्रेः सर्वकामपूरितस्य मरुत्तस्य गृहे विश्वे सर्वे देवाः सभासदः सभाया मुपविष्टाः सेवन्त इति शेषः । इत्येष सर्वोऽपि महाभिषेकस्य महिमेत्यभिप्रायः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्य एकोनचत्वारिंशाध्याये सप्तमः खण्डः ॥७॥ (२१) [१७९] ।

अङ्गनामकं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयोऽङ्गमभिषिषेच तस्माद्वङ्गः समन्तं सर्वतः पृथिवीं जयन्परीयाश्वेन च मेध्येनेजे, इति ।

उदमयनामकः कश्चिन्महर्षिरत्रेः पुत्रोऽङ्गमभिषिषेच ।

तस्याङ्गाभिषेकस्य माहात्म्यं दर्शयितुं कंचिद्वृत्तान्तमाह—

स होवाचालोपाङ्गो दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप मा[illegible]ह्वयस्वेति, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योऽयमङ्गनामको राजोक्तः सोयमलोपाङ्गः संपूर्णावयव इत्यर्थः । महदस्याङ्गसौष्ठवम् । स कदाचित्स्वकीयाभिषेककर्तुर्युदमयनामके पुरोहिते स्वार्थं यागं कुर्वाणे सति तं प्रत्येवमुवाच । हे ब्राह्मणास्मिंस्त्वदीये यज्ञे मामुपह्वयस्व समाह्वानं कुरु । अहमागत्य त्वदीययज्ञे दक्षिणासंपूर्त्यर्थं तुभ्यं गजसहस्राणि दासीसहस्राणि च ददामीति । सेयं बहुदानसंपत्तिः सद्बुद्धिश्च महाभिषेकप्रसादलब्धा ।

एवमेवार्थं प्रपञ्चयितुं श्लोकानुदाहरति—

तदप्येते श्लोका अभिगीताः, इति ।

तस्मिन्नप्यङ्गराजपुरोहितस्य यागे दानप्रतिपादका एते पञ्च श्लोका अभितो गीताः सर्वतोऽभिज्ञैः पठिताः ।

तत्र प्रथमं श्लोकमाह—

याभिर्गोभिरुदमयं प्रैयमेधा अयाजयन् ।
द्वे द्वे सहस्रे बद्धानामात्रेयो मध्यतोऽददात् ॥ इति ।

प्रियमेधस्य पुत्राः प्रैयमेधा महर्षय उदमयनामकमङ्गराजपुरोहितं याभिर्गोभिर्दक्षिणारूपाभिरयाजयन् । ता गावो वक्ष्यन्त इति शेषः । बद्धमिति शतकोटिसंख्याया नामधेयम् । बद्धानां शतकोटिसंख्याकानां गवां मध्ये प्रतिदिनं द्वे द्वे सहस्रे मध्यतो माध्यंदिनसवनेऽत्रिपुत्र उदमयो दत्तवान् ।

द्वितीयं श्लोकमाह—

अष्टाशीतिः सहस्राणि श्वेतान्वैरोचनो हयान् ।
प्रष्टीन्निश्चृत्य प्रायच्छद्यजमाने पुरोहिते, इति ।

वैरोचनो विरोचनस्य पुत्रोऽङ्गनामको राजा स्वकीयपुरोहित उदमयनामके यजमाने यागं कुर्वाणे स्वयमागत्याष्टाशीतिसहस्रसंख्याकानश्वाञ्श्वेतवर्णान्प्रष्टीन्पृष्ठवाहनयोग्यवयस्कान्निश्चृत्य स्वकीयाश्वबन्धनस्थानान्निःसार्य प्रायच्छद्दत्तवान् ।

तृतीयं श्लोकमाह—

देशाद्देशात्समोह्लानां सर्वासामाढ्यदुहितृणाम् ।
दशाददात्सहस्राण्यात्रेयो निष्ककण्ठ्यः, ॥ इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देशाद्देशाद्दिग्विजयकाले तत्तद्देशविशेषात्समोहळानां सम्यगासमन्ता-
दूढानामानीतानामाढ्यदुहितृणां धनिकपुत्रीणां सर्वासां दश सहस्राण्यात्रे-
योऽङ्गराजपुरोहितो दत्तवान्। ताश्च दुहितरो निष्ककण्ठ्य आभरणोपेत-
कण्ठयुक्ताः।

चतुर्थं श्लोकमाह—

दश नागसहस्राणि दत्त्वाऽऽत्रेयोऽवचत्नुके।
श्रान्तः पारिकुटान्प्रैष्सद्दानेनाङ्गस्य ब्राह्मणः॥ इति।

अङ्गराजस्य पुरोहितो ब्राह्मण आत्रेयोऽवचत्नुकनामदेशे गजसहस्राणि
दशसंख्याकानि दत्त्वा दानेन श्रान्तः सन्पारिकुटान्परिचारकान्प्रैष्सत्प्रेषि-
तवान्। हे परिचारका यूयं दत्तेत्येवमुक्तवानित्यर्थः।

पचमं श्लोकमाह—

शतं तुभ्यं शतं तुभ्यमिति स्मैव प्रताम्यति।
सहस्रं तुभ्यमित्युक्त्वा प्राणान्स्म प्रतिपद्यत इति॥२२॥ इति।

परिचारकाणामप्यग्र एकैकशो वक्तुमशक्तस्तुभ्यं शतं तुभ्यं शतमिति
शतसंख्यां प्रोक्त्वा तत्रापि प्रताम्यति स्मैव ग्लानिमेव प्राप्तवान्। ततः
शतसंख्यां परित्यज्य सहस्रं तुभ्यमित्युक्त्वा तस्यामपि संख्यायां बहुशः
प्रोक्तायामा, श्रान्तः सन्प्राणान्प्रतिपद्यते स्म। मध्ये मध्ये श्रमपरिहाराय
दीर्घश्वासं कृतवानित्यर्थः। अङ्गराजस्य पुरोहितायाप्येतादृशसामर्थ्यं
महाभिषेकप्रसादलब्धमिति तात्पर्यार्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-
भाष्य एकोनचत्वारिंशाध्यायेऽष्टमः खण्डः॥८॥ (१२) [१८०]।

दुष्यन्तस्य पुत्रं भरताख्यं राजानमुदाहरति—

एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमा मामतेयो
भरतं दौष्पन्तिमभिषिषेच तस्माद्दु भरतो दौष्पन्तिः समन्तं
सर्वतः पृथिवीं जयन्परीयायाश्वमेधैरीजे, इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ममताख्यायाः स्त्रियाः पुत्रो दीर्घतमा इत्येतन्नामा मुनिर्भरतमभिषिषेच। भरतोऽपि दिग्विजयेन पृथिवीं परीत्य मेध्यैरश्वैरपीजे। उ चेति निपातयोः समूहः समुच्चयार्थः।

भरताभिषेकमाहात्म्यं दर्शयितुं श्लोकानुदाहरति--

तदप्येते श्लोका अभिगीताः, इति।

तत्तस्मिन्भरताभिषेकमाहात्म्येऽप्येते वक्ष्यमाणाः पञ्च श्लोका अभितः परिगीयन्ते।

तत्र प्रथमं श्लोकमाह--

हिरण्येन परीवृतान्कृष्णाञ्शुक्लदतो मृगान्।
मष्णारे भरतोऽददाच्छतं बद्धानि सप्त च॥ इति।

मृगशब्देनात्र गजा विवक्षिताः। मृगवदिति बाहुल्यविवक्षया मृगशब्दः। ते च गजा हिरण्येन परीवृताः सर्वाभरणयुक्ताः शरीरपुष्ट्या वर्णोत्कर्षे सत्यत्यन्तं कृष्णाः प्रतिभासन्ते। शुक्लाभ्यां दन्ताभ्यां युक्ताः। तादृशान्गजान्मष्णारनामके देशे भरतो राजा दत्तवान्। शतमित्यादि तत्संख्योच्यते। बद्धं वृन्दमित्येतौ पर्यायौ। वृन्दशब्दश्च शतकोटिवाचित्वेन गणिते ग्रन्थकारैर्दर्शितः--

"एकं दश च शतं च सहस्रं च युतनियुते तथा।
प्रयुतकोटचर्बुदं वृन्दं स्थानं स्थानाद्दशगुणं स्यात्"॥ इति।

तानि च शतकोटिरूपाणि बद्धानि सप्ताधिकशतसंख्याकानि। तावतो गजान्दत्तवानित्यर्थः।

द्वितीयं श्लोकमाह--

भरतस्यैष दौष्पन्तेराग्नेः साचीगुणे चितः।
यस्मिन्सहस्रं ब्राह्मणा बद्धशो गा विभेजिरे,॥ इति।

साचीगुणनामके कस्मिंश्चिद्देशे दुष्पन्तपुत्रस्य भरतस्यैषोऽग्निश्चितः। अग्निचयनं कृतवानित्यर्थः। यस्मिन्नग्निचयने सहस्रसंख्याका ब्राह्मणा बद्धशः प्रत्येकं शतकोटिसंख्यया गा विभेजिरे। गवां विभागं कृतवन्तः।

तृतीयं श्लोकमाह--

अष्टासप्ततिं भरतो दौष्पन्तिर्यमुनामनु।
गङ्गायां वृत्रघ्नेऽश्वमेधात्पञ्चपञ्चाशतं हयान्॥ इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मेध्यैरश्वैरीज इत्युक्तं तेषामश्वानां संख्याऽवोच्यते। अष्टाधिका सप्ततिरष्टासप्ततिः। तामष्टासप्ततिं दुष्षन्तपुत्रो भरतो यमुनामनु यमुनायास्तीरेऽबध्नाद्बद्धवान्। तावतोऽश्वमेधान्कृतवानित्यर्थः। गङ्गायां गङ्गातीरे वृत्रघ्ननामके देशे पञ्चाधिकपञ्चाशत्संख्याकान्हयानबध्नात्। तावतोऽश्वमेधान्कृतवान्।

चतुर्थं श्लोकमाह—

त्रयस्त्रिंशच्छतं राजाऽश्वान्बद्ध्वाऽ(यं) मेध्यान्।
दौष्षन्तिरत्यगाद्राज्ञो मायां मायवत्तरः, ॥ इति।

यमुनातीरे गङ्गातीरे चानुष्ठिता अश्वात्रयस्त्रिंशदधिकशतसंख्याकाः। तावतोऽश्वन्मेध्यान्यज्ञयोग्यान्बिध्युक्तक्रमेण बन्धनं कृत्वा सोऽयं राजा दौष्षन्तिर्मायवत्तरोऽतिशयेन मायावी सन्राज्ञः स्वकीयशत्रोर्मायामत्यगादतिक्रान्तवान्।

पञ्चमं श्लोकमाह—

महाकर्म भरतस्य न पूर्वे नापरे जनाः।
दिवं मर्त्य इव हस्ताभ्यां नोदापुः पञ्च मानवा इति ॥ इति।

भरतस्य राज्ञो यदेतन्महाकर्म तदेतत्पूर्वे पित्रादयो न कर्तुं शक्ताः। अपरे जनाः पुत्रपौत्रादयश्च न कर्तुं शक्ताः। तत्र दृष्टान्तः। यथा मनुष्यो दिवं स्वर्गं हस्ताभ्यां स्प्रष्टुमशक्त एवं पञ्च मानवा निषादपञ्चमाश्चत्वारो वर्णा नोदापुस्तदीयं कर्म प्राप्तुमशक्ताः। सोऽयं सर्वोऽपि महाभिषेकस्य महिमेत्यर्थः।

अथ संप्रदायकथनमुखेन महाभिषेकं प्रशंसति—

एतं ह वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच तस्माद्दु दुर्मुखः पाञ्चालो राजा सन्विद्यया समन्तं सर्वतः पृथिवीं जयन्परीयाय, इति।

बृहदुक्थनामकः कश्चिदृषिः पञ्चालदेशस्वामिने दुर्मुखनाम्ने राज्ञे तमेतमिन्द्रसंबन्धिनं महाभिषेकं प्रोवाच तस्मादेव कारणात्स राजा सन्विद्यया महाभिषेकज्ञानेनैव सर्वासु दिक्षु समन्तं समग्रां पृथिवीं जयन्परीयाय परितः संचचार।

अथ ब्राह्मणस्योक्ताभिषेकाधिकाराभावेऽपि तद्विद्याधिकारसद्भावात्फलसिद्धिं दर्शयति—

Funding by IKS-MoE

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Siddhanta eGangotri Gyaan Central Trust, Chandigarh.

एतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्योऽत्यरातये जानंतपये प्रोवाच तस्माद्धत्यरातिर्जानंतपिरराजा सन्विद्यया समन्तं सर्वतः पृथिवीं जयन्परीयाय, इति ।

वसिष्ठगोत्रोत्पन्नो वासिष्ठः सत्यहव्यस्य पुत्रः सात्यहव्यस्तादृशो मुनिरत्यरातिनामकाय जनंतपपुत्राय ब्राह्मणाय तमेतं महाभिषेकं प्रोवाच । तस्मादेव कारणादयमत्यरातिर्जानतपिः स्वयमराजा सन्नप्यभिषेकविद्यया जयं प्राप्तः परितो गतवान् ।

यथाऽभिषेके शपथं कृत्वा गुरुद्रोहो न कर्तव्य एवं विद्यायामपीति दर्शयति–

स होवाच वासिष्ठः सात्यहव्योऽजैषीर्वै समन्तं सर्वतः पृथिवीं महन्मा गमयेति स होवाचात्यरातिर्जानंतपिर्यदा ब्राह्मणोत्तरकुरूञ्जयेयमथ त्वमुहैव पृथिव्यै राजा स्याः सेनापतिरेव तेऽहं स्यामिति स होवाच वासिष्ठः सात्यहव्यो देवक्षेत्रं वै तन्न वै तन्मर्त्यो जेतुमर्हत्यद्रुक्षो वै म आ त इदं दद इति ततो हात्यरातिं जानंतपिमात्तवीर्यं निःशुक्रममित्रतपनः शुष्मिणः शैव्यो राजा जघान, इति ।

सात्यहव्यो वासिष्ठो गुरुरत्यरातिं शिष्यमेवमुवाच । हेऽत्यरातेऽविद्यासामर्थ्यात्पृथिवीं जितवानसि । अतो मां गुरुं महद्गमय महत्त्वमैश्वर्यं प्रापय । ततः शिष्योऽत्यरातिरेवमुवाच । मा भूदिदानीं तव महत्त्वम् । हे ब्राह्मणाचार्य यदाऽहमुत्तरकुरुनामकान्हिमवत्पर्वतस्योत्तरदेशाञ्जयेयं तदानीं त्वमेव पृथिव्या राजा भव । अहं तु त्वदीयसेनापतिरेव भवामीति । ततः सात्यहव्यो वासिष्ठः स गुरुरेवमुवाच । हेऽत्यरातेऽमेरोरुत्तरतो यदस्ति तद्देवक्षेत्रमतस्तत्क्षेत्रं मनुष्यो जेतुं नैवार्हति । त्वं तु मे मह्यमद्रुक्षो वै द्रोहं कृतवानेव । मदपेक्षितं महत्त्वं दातुमनिच्छुः सन्वञ्चनार्थं यत्किंचिदुक्तवानसि । अतः शपथोल्लङ्घिनो गुरुद्रोहिणस्तवेदं सामर्थ्यमाददेऽपहरामीति । ततः सामर्थ्यापहरणादत्यरातिं जानंतपिं गुरुणाऽपहृतवीर्यमपहृततेजस्कं कश्चिच्छत्रुतापनः शिविपुत्रः शुष्मिणाख्यो राजा जघान हतवान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एतद्वृत्तान्तकथनफलं दर्शयति—

तस्मादेवंविदुषे ब्राह्मणायैवंचक्रुषे न क्षत्रियो द्रुह्येन्नेद्राष्ट्रा-दवपद्येयं नेद्वा मा प्राणो जहदिति जहदिति ॥ २३ ॥ इति ।

यस्माद्गुरुद्रोहे महती हानिरुक्ता तस्मादेवंविदुषे महाभिषेकाभिज्ञायैवं-चक्रुषेऽभिषेककर्त्रे ब्राह्मणायाऽऽचार्याय क्षत्रियो न द्रुह्येत् । केनाभि-प्रायेणेति सोऽभिधीयते । राष्ट्रादस्मादेशान्नेदवपद्येयं नैव भ्रष्टो भूयासम् । अथवा मा प्राणो नेज्जहन्नैव परित्यजत्वित्यभिप्रायः । अभ्यासोऽध्याय-समाप्त्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये नवमः खण्डः ॥ ९ ॥ (२३) [१८१] ।

इति ऐतरेयब्राह्मणे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

अथ चत्वारिंशोऽध्यायः ।

महाभिषेक ऐन्द्रो यः क्षत्त्रस्यासौ पुरोहितः ।
पौरोहित्यं ब्राह्मणस्य वक्तव्यमधुनोच्यते ॥

तदेतत्प्रतिजानीते—

अथातः पुरोधाया एव, इति ।

अथ क्षत्रियाय महाभिषेककथनानन्तरं यतो ब्राह्मणस्य पौरोहित्यं बहुषु श्रुतं भवत्यत कारणात्पुरोधाया एव पौरोहित्यस्यैव विधिरुच्यते इति शेषः ।

तद्विधिं दर्शयति—

न ह वा अपुरोहितस्य राज्ञो देवा अन्नमदन्ति तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरो दधीत देवा मेऽन्नमदन्निति, इति ।

यस्मादपुरोहितस्य राज्ञोऽन्नं देवा नादन्ति न भक्षयन्ति तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरोहितं कुर्यात् । केनाभिप्रायेणेति सोऽभिधीयते । देवा मदीयमन्नमदन्नदन्त्विति तस्याभिप्रायः । यक्ष्यमाण इति वा पदच्छेदः । यागाभावेऽपि प्रजापरिपालनधर्मबोधनाय पुरोहितः संपादनीयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदेवमेतत्प्रशंसति—

अग्नीन्वा एष स्वर्ग्यान्राजोद्धरते यत्पुरोहितम्, इति ।

पुरोहितं संपादयतीति यदस्ति तेनैष राजा स्वर्गहेतूनग्नीनेवोद्धरते ।

तानग्नींदर्शयति—

तस्य पुरोहित एवाऽऽहवनीयो भवति जाया गार्हपत्यः पुत्रोऽन्वाहार्यपचनः स यत्पुरोहिताय करोत्याहवनीय एव तज्जुहोत्यथ यज्जायायै करोति गार्हपत्य एव तज्जुहोत्यथ यत्पुत्राय करोत्यन्वाहार्यपचन एव तज्जुहोति त एनं शान्ततनवोऽभिहुता अभिप्रीताः स्वर्गं लोकमभिवहन्ति क्षत्त्रं च बलं च राष्ट्रं च विशं च, इति ।

तस्य राज्ञः पुरोहितादय एवाऽऽहवनीयाद्यग्निस्थानीयाः । अन्वाहार्यपचनो दक्षिणाग्निः । स राजा पुरोहितादिभ्यो यदपेक्षितं करोति तदेतदाहवनीयादिषु होमसमानम् । अतः पुरोहितद्वारा तेऽग्नयः शान्ततनवः स्वकीयमुग्ररूपत्वं परित्यज्याभीष्टहोमेन प्रीता एनं क्षत्त्रियं स्वर्गादिकं प्रापयन्ति । क्षत्त्रं मानसोत्साहरूपं शौर्यम् । बलं शारीरम् । राष्ट्रं देशः । विट् प्रजा । पुरोहितादिप्रीत्या तदेतत्सर्वं प्राप्यते ।

विपक्षे बाधकमाह—

त एवैनमशान्ततनवोऽनभिहुता अनभिप्रीताः स्वर्गाल्लोकान्नुदन्ते क्षत्त्राच्च बलाच्च राष्ट्राच्च विशश्च, इति ।

त एव पुरोहितादयोऽभीष्टहोमाभावेन प्रीतिरहिता अशान्ततनवः स्वर्गादेरेनमपनुदन्ते ।

पुनरपि पुरोहितं प्रकारान्तरेण प्रशंसति ।

अग्निर्वा एष वैश्वानरः पञ्चमेर्नियत्पुरोहितस्तस्य वाच्येवैका मेनिर्भवति पादयोरेका त्वच्येका हृदय एकोपस्थ एका ताभिर्ज्वलन्तीभिर्दीप्यमानाभिरुपोदेति राजानं स यदाह क्व भगवोऽवात्सीस्तृणान्यस्मा आहरतेति तेनास्य तां शमयति याऽस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाचि मेनिर्भवत्यथ यदस्मा उदकमानयन्ति पाद्यं तेनास्य तां शमयति याऽस्य पादयोर्मेनिर्भवत्यथ यदेनमलं कुर्वन्ति तेनास्य तां शमयति याऽस्य त्वचि मेनिर्भवत्यथ यदेनं तर्पयन्ति तेनास्य तां शमयति याऽस्य हृदये मेनिर्भवत्यथ यदस्यानारुद्धो वेश्मसु वसति तेनास्य तां शमयति याऽस्योपस्थे मेनिर्भवति, इति ।

परोपद्रवकारिणी क्रोधरूपा शक्तिर्मेनिरित्युच्यते । यथाऽग्नेर्ज्वाला तद्वत् । अतो यः पुरोहितोऽस्ति सोऽयं पञ्चविधमेन्युपेतो वैश्वानरनामकाग्निसमानः । वागादीनि पञ्च मेनिस्थानानि । अतः पुरोहितस्ताभिर्मेनिभिर्ज्वलन्तीभिर्ज्वालासदृशीभिर्दीप्यमानाभिः परेषु दीप्तिं संतापं कुर्वतीभिः सह राजानमुपोदेति समीपे प्राप्नोति । तदा स राजा हे भगवन्नेतावन्तं कालं कुत्रावात्सीः । एतस्य पुरोहितस्योपवेशनार्थं हे परिचारकास्तृणानि तृणनिर्मितकुशाद्यासनान्यहरतेत्यनेन राजसंबन्धिना प्रियवाक्येन वाच्येका या मेनिर्बाधिका शक्तिस्तां स राजा शमयति । पाद्यार्थोदकानयनेन पादगता मेनिः शाम्यति । वस्त्रगन्धाद्यलंकरणेन त्वग्गता मेनिः शाम्यति । धनादिना संतर्पणेन हृदयगता मेनिः शाम्यति । अस्य राज्ञो वेश्मस्थानारुद्धो निरोधरहितः शयनादिकं कुर्वन्विस्रम्भेण वसतीति यदस्ति तेनोपस्थस्था मेनिः शाम्यति । गृहे समागतस्य पुरोहितस्यैतावन्त उपचाराः कर्तव्या इत्यर्थः ।

अन्वयव्यतिरेकाभ्यामुक्तोपचारं प्रशंसति—

स एनं शान्ततनुरभिहुतोऽभिप्रीतः स्वर्गं लोकमभिवहति क्षत्त्रं च बलं च राष्ट्रं च विशं च स एवैनमशान्ततनुरनभिहुतोऽनभिप्रीतः स्वर्गाल्लोकान्नुदते क्षत्त्राच्च बलाच्च राष्ट्राच्च विशश्च ॥ २४ ॥ इति ॥

उक्तोपचारहोमेन प्रीतौ सत्यां शान्ततनुः स्वर्गादिकं प्रापयतीत्यन्वयः । उक्तोपचारहोमाभावे स्वर्गादेरपनुदतीति व्यतिरेकः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चत्वारिंशाध्याये प्रथमः खण्डः ॥ १ ॥ (२४) [१८२] ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उक्तोपचारेण प्रीतं पुरोहितं दृष्टान्तेन प्रशंसति —

अग्निर्वा एष वैश्वानरः पञ्चमेनिर्यत्पुरोहितस्ताभी राजानं परिगृह्य तिष्ठति समुद्र इव भूमिम्, इति ।

योऽयं पुरोहितोऽस्ति स एष पञ्चमेनिः पञ्चविधोग्रशक्तियुक्तो वैश्वानरनामकोऽग्निरेव । निग्रहानुग्रहयोरग्निवच्छक्तिमत्त्वात् । पुरोहितस्ताभिः शान्ताभिः शक्तिभिस्तं राजानं परिगृह्य परितः स्वीकृत्य तिष्ठति । यथा समुद्रो भूमिं परितः स्वीकृत्य तिष्ठति तद्वत् ।

पुरोहितवशादनिष्टं परिहारयति —

अयुवमार्यस्य राष्ट्रं भवति नैनं पुराऽऽयुषः प्राणो जहात्याजरसं जीवति सर्वमायुरेति न पुनर्म्रियते यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितः, इति ।

यस्य राज्ञ एवं विद्वान्वेदशास्त्रोक्तप्रकारेण धर्माधर्मौ बोधयितुमभिज्ञो ब्राह्मणो राष्ट्रगोपो राज्यपरिपालनक्षमः पुरोहितो भवतीदृशस्याऽऽर्यस्य राज्ञो राष्ट्रमयुवं कदाचिदपि पृथग्भावरहितं भवति 'यु मिश्रणामिश्रणयोः' इति धातुरमिश्रणे वर्तते । अयुवमिति पदेन स निषिध्यते राष्ट्रमस्थिरं न भवतीत्यर्थः । अथवाऽस्य राष्ट्रमयुवमारियुवमरणरहितं भवतीत्यर्थः । एनं राजानमायुषः पुरा प्राणो न परित्यजति । अपमृत्युर्न भवतीत्यर्थः । अत एवाऽऽजरसं जरापर्यन्तं सुखेन जीवति । सर्वमायुरेति प्राप्तायामपि जरायामवशिष्टं सर्वमायुः प्राप्नोति । ततः सकृन्मृत्वा न पुनर्म्रियते । पुरोहितमुखेन तत्त्वज्ञानं सपाद्य मुच्यत इत्यर्थः ।

अनिष्टपरिहारं दर्शयित्वेष्टप्राप्तिं दर्शयति —

क्षत्त्रेण क्षत्त्रं जयति बलेन बलमश्नुते यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितः, इति ।

उक्तविधपुरोहितयुक्तो राजा स्वकीयेन क्षत्त्रेण कुमारादिना परकीयं क्षत्त्रं कुमारादिकं जयति । तथा स्वकीयेन बलेन सैन्येन परकीयं बलं सैन्यमश्नुते व्याप्नोति । अभिभवतीत्यर्थः ।

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इष्टप्राप्त्यनिष्टपरिहारौ दर्शयित्वा प्रजानुरागं दर्शयति—

तस्मै विशः संजानते संमुखा एकमनसो यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितः ॥ २५ ॥ इति ।

उक्तविधपुरोहितयुक्ताय तस्मै तस्य राज्ञो विशः प्रजाः संजानते राज्ञा सहैकमत्यं प्राप्नुवन्ति। प्राप्य च परस्परमप्येकमनस्का राज्ञः संमुखा भवन्ति न तु कस्मिन्नपि कार्ये विमुखाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चत्वारिंशाध्याये द्वितीयः खण्डः ॥ २ ॥ (२५) [१८३]।

———

पुरोहितमहिमानं दर्शयितुं मन्त्रमुदाहरति—

तदप्येतदृषिणोक्तम् इति, ।

तदेतत्पुरोहितमाहात्म्यमप्यृषिणा मन्त्रदर्शिना तिसृभिर्ऋग्भिरुक्तम्।

तत्र प्रथमाया ऋचः पूर्वार्धं दर्शयति—

स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण इति, इति ।

स इत्स एव पुरोहितयुक्तो राजा प्रतिजन्यानि प्रतिपक्षबलानि विश्वा सर्वाणि शुष्मेण वीर्येण स्वकीयेनाधिकेन बलेनाभितस्थावभितिष्ठति। अभिभवतीत्यर्थः।

अस्यार्धस्य तात्पर्यं दर्शयति—

सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानेव तच्छुष्मेण वीर्येणाधितिष्ठति, इति ।

जन्यानीत्यनेन सपत्ना एवाभिधीयन्ते । सपत्नशब्दस्य व्याख्यानं द्विषन्तो भ्रातृव्या इति। तानेव भ्रातृव्यांस्तत्तेन शुष्मेणाधिकेन वीर्येण सामर्थ्येनाधितिष्ठत्यभिभवति ।

तृतीयं पादमनूद्य व्याचष्टे—

बृहस्पतिं यः सुभृतं बिभर्तीति बृहस्पतिर्ह वै देवानां पुरोहितस्तमन्वन्ये मनुष्यराज्ञां पुरोहिता बृहस्पतिं यः सुभृतं बिभर्तीति यदाह पुरोहितं यः सुभृतं बिभर्तीत्येव तदाह, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यो बृहस्पतिं बृहस्पतितुल्यं पुरोहितं सुभृतं यथा स्यात्सम्यगवस्थाप्येति यावत्तथा बिभर्ति पोषयति स इद्राजेति पूर्वत्रान्वयः। यो देवानां बृहस्पतिः पुरोहितस्तं बृहस्पतिमनु पश्चान्मनुष्यराज्ञामन्ये पुरोहिता वर्तन्ते। अतः पुरोहितानां बृहस्पत्यनुसारित्वाद्बृहस्पतिमित्यादिपदेन पुरोहितविषयमेवैतद्वाक्यं मन्त्र आह।

चतुर्थं पादमनूद्य व्याचष्टे—

वल्गूयति वन्दते पूर्वभाजमित्यर्चितिमेवास्मा एतदाह, इति।

स राजा पूर्वभाजं प्रथमतो भजनयुक्तं पुरोहितं स हि राजानं तदीयहितविचारेण प्रथमतो भजति। तादृशं वल्गूयति राजार्चयति वन्दते नमस्करोति। एतदनेन पादेनास्मा अस्मिन्यजमानेऽर्चितिमेव मन्त्र आह—

द्वितीयस्या ऋचः प्रथमं पादमनूद्य पूजामेव व्याचष्टे।

स इत्क्षेति सुधित ओकसि स्व, इति गृहा वा ओकः स्वेष्वेव तद्गृहेषु सुहितो वसति, इति।

स इत्स एव राजा यत्र पूजितः पुरोहितः सुधितः सुप्रीतः निवसति स्वे स्वकीय एवौकसि गृहे क्षेति निवसति। ओकःशब्देनात्र गृहा एवोच्यन्ते। ततः स्वेष्वेव गृहेषु सुप्रीतो वसतीत्युक्तं भवति।

द्वितीयं पादमनूद्य व्याचष्टे—

तस्मा इळा पिन्वते विश्वदानीमित्यन्नं वा इळाऽन्नमेवास्मा एतदूर्जस्वच्छश्वद्भवति, इति।

तस्मै पुरोहितयुक्ताय राज्ञ इळाऽन्नम्। विश्वदानीं सर्वस्मिन्नपि काल इदानीं तदानीमित्यादिवदवगन्तव्यम्। पिन्वते वर्धते। अन्नसमृद्धिर्भवति। अस्मिन्पाद इळाशब्देनान्नमेवोच्यते। एतदन्नमस्मा अस्मिन्राजनि ऊर्जस्वत्क्षीरादिरसोपेतं शश्वत्सर्वदा तिष्ठति।

तृतीयं पादमनूद्य व्याचष्टे—

तस्मै विशः स्वयमेवाऽऽनमन्त इति राष्ट्राणि वै विशो राष्ट्राण्येवैनं तत्स्वयमानमन्ति, इति।

Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Digital Preservation Foundation, Chandigarh.

तस्मै पुरोहितयुक्ताय राज्ञे विशः प्रजाः स्वयमेव तदीयप्रयत्ननिरपेक्षा आनमन्त आनतिं प्राता भवन्ति। अस्मिन्पादे विट्शब्देन राष्ट्राण्येव प्रजोपेता देशा एव विवक्षिताः। तादृशानि राष्ट्राण्येनं पुरोहितयुक्तं क्षत्रियं स्वयमेव प्राप्नुवन्ति।

चतुर्थं पादमनूद्य व्याचष्टे—

यस्मिन्ब्रह्मा राजनि पूर्व एतीति पुरोहितमेवैतदाह, इति।

यस्मिन्राजनि ब्रह्मा ब्राह्मणो हितमुपदिशन्पूर्वं एति प्रथमतो गच्छति स इत्क्षेतीति पूर्वंत्रान्वयः। अनेन पादेन पूर्वं एतीत्येव पुरोहितमेव मन्त्रो ब्रूते।

तृतीयस्या ऋचः प्रथमं पादमनूद्य व्याचष्टे—

अप्रतीतो जयति सं धनानीति राष्ट्राणि वै धनानि तान्य-प्रतीतो जयति, इति।

अयं पुरोहितयुक्तो राजाऽप्रतीतः प्रतिकूलैः शत्रुभिरितः प्राप्तः प्रतीतस्तद्विपरीतोऽप्रतीतः शत्रुप्राप्तिरहित एव भूत्वा धनोपेतानि राष्ट्राणि सम्यग्जयति। अस्मिन्पादे धनशब्देन राष्ट्राण्येव विवक्षितानि। तानि स्वयं प्रतिपक्षरहित एव जयति।

द्वितीयं पादमनूद्य व्याचष्टे—

प्रतिजन्यान्युत या सजन्येति सपत्ना वै द्विषन्तो भ्रातृव्या जन्यानि तानप्रतीतो जयति, इति।

जन्यानि शत्रूनप्रतीतः स्वयमप्रतिपक्षो जयतीत्यनुवर्तते। किंच या सेना सजन्या शत्रुसहिता तामपि जयति। अस्मिन्पादे जन्यशब्देन सपत्ना अभिधीयन्ते। तस्य व्याख्यानं द्विषन्तो वै भ्रातृव्या इति। तान्भ्रातृव्यान्प्रतिपक्षरहितो जयति।

तृतीयं पादमनूद्य व्याचष्टे—

अवस्यवे यो वरिवः कृणोतीति यदाहावसीयसे योऽवसीयः करोतीत्येव तदाह, इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवस्यवे वसुरहिताय ब्राह्मणाय पुरोहिताय यो राजा वरिवः कृणोति परिचर्यां करोतीति मन्त्रो यदाह तत्रावसीयसेऽत्यन्तदरिद्राय धनरहिताय यो राजाऽवसीयोऽतिशयेन धनिकत्वं करोतीत्यनेनैव प्रकारेण मन्त्रो ब्रूते ।

चतुर्थं पादमनूद्य व्याचष्टे –

ब्रह्मणे राजा तमवन्ति देवा, इति पुरोहितमेवैतदभिवदति ॥ २६ ॥ इति ।

ब्रह्मणे ब्राह्मणाय पूर्वोक्तेनावस्यव इति चतुर्थ्यन्तेनान्वेति । तथा राजेति पदं य इत्यनेनान्वेति । तं तादृशं पुरोहितपूजकं राजानं देवा अवन्ति पालयन्ति । एतदेतेन ब्रह्मण इति पदेन पुरोहितमेव मन्त्रोऽभिवदति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणभाष्ये चत्वारिंशाध्याये तृतीयः खण्डः ॥ ३ ॥ (२६) [१८४] ।

अथ पौरोहित्यस्य योग्यायोग्यौ ब्राह्मणो विविनक्ति –

यो ह वै त्रीन्पुरोहितांस्त्रीन्पुरोधातृन्वेद स ब्राह्मणः पुरोहितः स वदेत पुरोधाया अग्निर्वाव पुरोहितः पृथिवी पुरोधाता वायुर्वाव पुरोहितोऽन्तरिक्षं पुरोधाताऽऽदित्यो वाव पुरोहितो द्यौः पुरोधातैष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद, इति ।

राज्ञा स्वहितोपदेशार्थं स्वस्य पुरोहितोऽवस्थापितः । तस्य पुरोहितस्य योऽग्रमवस्थापयिता राजा स पुरोधाता । देवतासु मध्ये त्रयः पुरोहिताः सन्ति । ये च त्रयः पुरोधातारस्तानुभयविधान्यो वेद तत्प्रतिपादकं मन्त्रं सर्वदाऽनुसंधत्त इत्यर्थः स तादृशो ब्राह्मणः पुरोहितो भवितुं योग्यः । स च ब्राह्मणः पुरोधायै पौरोहित्यार्थमग्निरित्यादिमन्त्रं वदेज्जपेत् । अग्निवाय्वादित्याः पुरोहितरूपाः । पृथिव्यन्तरिक्षद्युलोकाः पुरोधातृरूपा इति मन्त्रार्थः । यः पुमानेवं वेद मन्त्रार्थमनुसंधत्त एष एव योग्यः पुरोहितः । अथ तद्वैलक्षण्येन यः पुमानेवं न वेद स पुरोहितः पौरोहित्यादन्तर्हितस्तदयोग्य इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digitized by eGangotri Foundation, Chandigarh.

योग्यं पुरोहितं प्रशंसति—

तस्य राजा मित्रं भवति द्विषन्तमपबाधते यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितः, इति ।

यस्यैवंविधत्वादिगुणयुक्तः पुरोहितो भवेत्तस्य राज्ञो देशान्तरवर्ती राजा मित्रं बन्धुर्भवति । तथा द्विषन्तमन्यं राजानं पुरोहितयुक्तो राजाऽपबाधते विनाशयति ।

पुनरपि द्वेधा प्रशंसति—

क्षत्त्रेण क्षत्त्रं जयति बलेन बलमश्नुते यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितस्तस्मै विशः संजानते संमुखा एकमनसो यस्यैवं विद्वान्ब्राह्मणो राष्ट्रगोपः पुरोहितः, इति ।

पूर्ववद्व्याख्येयम् ।

अथ राज्ञः पुरोहितवरणमन्त्रमाह—

भूर्भुवः स्वरोममोऽहमस्मि स त्वं स त्वमस्यमोऽहं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेह संवहावहै । पुराण्यस्मान्महाभयात् । तनूरसि तन्वं मे पाहि, इति ।

भूर्भुवः स्वरिति शब्दैर्लोकत्रयाभिमानिन्यो देवता उच्यन्ते । प्रणवेन परमात्मा । एते सर्वेऽनुगृह्णन्त्वित्यभिप्रायः । पुरोहितोऽहममो द्युलोकरूपोऽस्मि । त्वं तु स भूर्लोकरूपोऽसि । पुनरपि स त्वमस्यमोऽहमित्यभिधानं दार्ढ्यार्थम् । तस्यैव व्याख्यानं द्यौरहं पृथिवी त्वमिति । तथा सामस्वरूपोऽहमृक्स्वरूपस्त्वमिति । तावुभावावामिह राष्ट्र आसद्यन्तात्पुराणि तदुपलक्षितग्रामांश्च संवहावहै सम्यग्वहनं पुरादिनिर्वाहं करवावहै । त्वं मम तनूः शरीरमसि । अतो मदीयां तन्वं शरीरमस्मादैहिकादामुष्मिकाच्च महाभयात्पाहि रक्ष ।

अनेन मन्त्रेण राज्ञा कृतो यः पुरोहितस्तस्य राजदत्तविष्टराभिमन्त्रणमाह—

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । ता मह्यमस्मिन्नासनेऽच्छिद्रं शर्म यच्छत, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोमो राजा यासामोषधीनां ताः सोमराज्यः। बह्व्यो बहुजातीयाः। शतविचक्षणाः शतशाखाभिन्नाः तादृश्य ओषधयो याः सन्ति तास्तथाविधा हे ओषधयोऽस्मिन्नासने तृणादिनिर्मितकटादिरूपे मह्यं पुरोहिताय च्छिद्ररहितं शर्म दुःखस्पर्शरहितं सुखं यच्छत दत्त।

अभिमन्त्रिते विष्टर उपवेशनमाह—

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। ता मह्यमस्मिन्नासनेऽच्छिद्रं शर्म यच्छत, इति।

वंशदलादिनिर्मितविष्टरगता ओषधयः पृथिवीमनु विष्ठिता विशेषेण स्थापिताः। ता मह्यमित्यादि पूर्ववत्।

पुरोहितस्य पाद्यार्थं समानीतानामपामभिमन्त्रणमन्त्रं दर्शयति—

अस्मिन्राष्ट्रे श्रियमावेशयाम्यतो देवीः प्रतिपश्याम्यापः, इति।

हे आपः पुरोहितोऽहमस्मिन्राष्ट्रे श्रियमावेशयामि धनादिसंपदं संपादयामि। अतः कारणाद्देवीर्द्योतनात्मिका युष्मान्प्रति पश्यामि।

ताभिरद्भिः पुरोहितस्य पादप्रक्षालनमन्त्रमाह—

दक्षिणं पादमवनेनिजेऽस्मिन्राष्ट्र इन्द्रियं दधामि। सव्यं पादमवनेनिजेऽस्मिन्राष्ट्र इन्द्रियं वर्धयामि। पूर्वमन्यमपरमन्यं पादाववनेनिजे। देवा राष्ट्रस्य गुप्त्या अभयस्यावरुद्ध्यै, इति।

मदीयं दक्षिणं पादमवनेनिजे प्रक्षालये। तेनास्मिन्राष्ट्रे प्राणिनामिन्द्रियपाटवहेतुं धनं संपादयामि। वामपादप्रक्षालनेन च तद्वर्धयामि। पूर्वं प्रथममन्यं दक्षिणं पादं शोधयित्वाऽपरं पश्चादन्यं वामं पादं शोधयामि। हे देवा एवंभूतौ पादौ प्रक्षालयामि। तच्च राष्ट्रस्य गुप्त्यै रक्षार्थमभयस्य चोरादिभयराहित्यस्यावरुद्धयै संपादनाय भवति।

पादप्रक्षालनावशिष्टानामपामभिमन्त्रणमाह—

आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे ॥ २७ ॥ इति।

Funding by IKS-MoE

CC-0. Agamhigam Digital Preservation Foundation, Chandigarh

पादावनेजनीः पादशुद्धिकरणभूता इमा आपो मे मदीयं द्विषन्तं शत्रुं निःशेषेण हन्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये चत्वारिंशाध्याये चतुर्थः खण्डः ॥४॥ (२७) [१८५] ।

———

अथोक्तपुरोहितसहितस्य शत्रुक्षयार्थं कंचित्प्रयोगमाह—

अथातो ब्रह्मणः परिमरो यो ह वै ब्रह्मणः परिमरं वेद पर्येनं द्विषन्तो भ्रातृव्याः परि सपत्ना म्रियन्ते, इति ।

अथ पौरोहित्यविधानानन्तरं यतः पुरोहितेन संपाद्यः शत्रुक्षयोऽपेक्षितोऽतः कारणाद्ब्रह्मणः परिमर एतन्नामकः कर्मविशेषोऽभिधीयत इति शेषः । ब्रह्मशब्देनात्र वायुर्विवक्षितः । अयं वै ब्रह्म योऽयं पवत इति वक्ष्यमाणत्वात् । तस्य वायोः परितो विद्युदादीनां मरणप्रकारः परिमर इत्युच्यते । तद्भावनारूपस्य कर्मविशेषस्य तदेव नामधेयम् । यः पुमान्ब्रह्मणः परिमरं यदा मनसा भावयत्येनं परित एतस्य परितोऽवस्थितासु सर्वासु दिक्षु द्वेषं कुर्वन्तः शत्रवो म्रियन्ते । इदानीमेनं द्विषन्तो जात्या शत्रवः सपत्नास्तेऽपि परितो म्रियन्ते । तस्मादेतद्वेदनं संपादनीयम् ।

वेदनस्वरूपमाह—

अयं वै ब्रह्म योऽयं पवते तमेताः पञ्च देवताः परिम्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निः, इति ।

योऽयं वायुः पवतेऽन्तरिक्षे संचरत्ययमेव ब्रह्मशब्देन विवक्षितः । एता विद्युदादयः पञ्च देवता वायुं परिम्रियन्ते । तस्य परितो विनाशं गच्छन्ति । तदेतदनुसंधेयस्वरूपम् ।

तत्राऽऽदौ विद्युतो मृतिं प्रतिपादयति—

विद्युद्वै विद्युत्य वृष्टिमनुप्रविशति साऽन्तर्धीयते तां न निर्जानन्ति, इति ।

योऽयं विद्युदस्ति सा विद्युत्य प्रकाशं कृत्वा पश्चाद्वृष्टिमनुप्रविशति । अत एव साऽन्तर्धीयतेऽस्माभिर्न दृश्यते । तां वृष्टौ प्रविष्टां विद्युतं क्व गता कुत्र स्थिता मृतेति मनुष्या निःशेषेण न जानन्ति ।

Funding by IKS-MoE

BVBSSMV
CC-0. eGangotri Digital Preservation Foundation, Chandigarh. AWSSVA

तत्र दृष्टान्तमाह--

यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति, इति ।

लोके कश्चित्पुरुषो यस्मिन्क्षणे म्रियते तस्मिन्नेव क्षणेऽन्यैर्न दृश्यते । ततो जना विचार्यापि क्व गतः कुत्रावस्थित इत्येनं पुरुषं मृतं न निर्जानन्ति । यद्यपि कुणपं पश्यन्ति तथाऽपि जीवात्मानं न जानन्त्येव । तथैव विद्युद्विनाश इति द्रष्टव्यम् ।

यथोक्तध्यानवतो जप्यमन्त्रमाह--

स ब्रूयाद्विद्युतो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति, इति ।

विद्युतो मरणे सत्युपासको द्विषदित्यादिकं मन्त्रं ब्रूयात् । तस्यायमर्थः--इयं विद्युदिव मदीयः शत्रुर्म्रियतां स पुनः केनापि न दृश्यताम् । अतो विचार्यापि क्व गतः क्वाऽऽस्त इति तं शत्रुं तदीया बन्धवो निःशेषेण मा जानन्त्विति ।

जपफलं दर्शयति--

क्षिप्रं हैवैनं न निर्जानन्ति, इति ।

शीघ्रमेव मृतमेनं शत्रुं तदीया बन्धवो नैव जानन्ति ।

विद्युत इव वृष्टेर्विनाशं दर्शयति--

वृष्टिर्वै वृष्ट्वा चन्द्रमसमनुप्रविशति साऽन्तर्धीयते तां न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयाद्वृष्टेर्मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति, इति ।

येयं वृष्टिरस्ति सेयं वृष्ट्वा भूमौ जलं पातयित्वा स्वयमाप्यमण्डलरूपं चन्द्रमसमनुप्रविशति । अन्यत्पूर्ववद्योज्यम् ।

चन्द्रमसो विनाशं दर्शयति -

चन्द्रमा वा अमावास्यायामादित्यमनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न

Funding by IKS-MoE
1046

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्जानन्ति स ब्रूयाच्चन्द्रमसो मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति, इति ।

अयं चन्द्रमा अमावास्यायां तिथौ साकल्येनाऽऽदित्यमनुप्रविशति । अन्यत्पूर्ववत् ।

आदित्यस्य विनाशं दर्शयति—

आदित्यो वा अस्तं यन्नग्निमनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादादित्यस्य मरणे द्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति, इति ।

आदित्यो यदाऽस्तमेति तदाऽयमग्निमनुप्रविशति । तदेतत्तैत्तिरीयैः समाम्नातम्—"अग्निं वा आदित्यः सायं प्रविशति । तस्मादग्निर्दूरात्तप्तं दहशे । उभे हि तेजसी संपद्येते" इति । अन्यत्पूर्ववत् ।

अग्नेर्विनाशं दर्शयति—

अग्निर्वा उद्वान्वायुमनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति यदा वै म्रियतेऽथान्तर्धीयतेऽथैनं न निर्जानन्ति स ब्रूयादग्नेर्मरणेद्विषन्मे म्रियतां सोऽन्तर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानन्ति, इति ।

उद्वानग्निरुद्दामप्रशमनं प्राप्नुवन्नग्निर्वायुमनुप्रविशति । वायुबाहुल्ये दीपविनाशदर्शनात् । अन्यत्पूर्ववत् ।

वायोः परितो म्रियमाणानां देवतानां पुनर्वायोरेव जन्म दर्शयति—

ता वा एता देवता अत एव पुनर्जायन्ते, इति ।

वायोर्जगत्कारणभूतसूत्रात्मरूपत्वाज्जगदेकदेशानां विद्युदादीनां जन्मविनाशौ वाय्वधीनौ ।

पूर्वं विद्युदादीनामग्न्यन्तानां क्रमेण विनाशो दर्शितः । इदानीमग्न्यादीनां विद्युदन्तानां क्रमेणोत्पत्तिं [illegible] दर्शयति—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वायोरग्निर्जायते प्राणाद्वि बलान्मथ्यमानोऽग्निर्जायते तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे द्विषञ्जन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्यति, इति ।

योऽयमग्निः सोऽयं वायोर्जायते । कथमेतदिति तदुच्यते । प्राणाद्बलात्प्राणवायुसंबन्धिशक्तिवशान्मथ्यमानोऽयमग्निरधिकत्वेन जायते । तं जायमानमग्निं दृष्ट्वा सोऽयमग्न्यादिजन्मघ्याताऽग्निरित्यादिकं मन्त्रं जपेत् । अयमग्निर्वायोः सकाशात्सुखेन जायताम् । मे द्विषन्मदीयः शत्रुर्मा जनि मोत्पद्यताम् । अत एव मत्तः पराङ्प्रणिघ्यतु विमुखो भूत्वा प्रकर्षेण गच्छतु । इत्येतस्मिन्मन्त्रे जपिते सत्यतो जपितुः सकाशाच्छत्रुर्विमुखो भूत्वा दूरे गच्छति ।

आदित्यस्योत्पत्तिं दर्शयति—

अग्नेर्वा आदित्यो जायते तं दृष्ट्वा ब्रूयादादित्यो जायता मा मे द्विषञ्जन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्यति, इति ।

रात्रावग्निं प्रविष्ट आदित्यः परेद्युरग्नेर्जायते । अत एवाहन्यग्निस्तेजोरहितः । सूर्योऽधिकतेजा भासते । अन्यत्पूर्ववत् ।

चन्द्रमस उत्पत्तिं दर्शयति—

आदित्याद्वै चन्द्रमा जायते तं दृष्ट्वा ब्रूयाच्चन्द्रमा जायतां मा मे द्विषञ्जन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्यति, इति ।

तिथावमावास्यायामादित्ये प्रविष्टश्चन्द्रमाः शुक्लपक्षप्रतिपद्यादित्याज्जायते । अन्यत्पूर्ववत् ।

वृष्टेरुत्पत्तिं दर्शयति—

चन्द्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद्वृष्टिर्जायतां मा मे द्विषञ्जन्यत एव पराङ्प्रजिघ्यत्वित्यतो हैव पराङ्प्रजिघ्यति, इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जलमये चन्द्रमण्डले प्रविष्टा वृष्टिः कालान्तरे चन्द्राज्जायते। अन्यत्पूर्ववत्।

विद्यदुत्पत्तिं दर्शयति—

वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूयाद्विद्युज्जायतां मा मे द्विषज्जन्यत एव पराङ्प्रजिघ्यत्येवत्यतो हैव पराङ्प्रजिघ्यति, इति।

वृष्टौ प्रविष्टा विद्युत्पुनरपि कदाचित्प्रसक्तायां वृष्टेर्जायते। अन्यपूर्ववत्।

उक्तमर्थमुपसंहरति—

स एष ब्रह्मणः परिमरः, इति।

स एष ध्यानरूपो जपरूपश्च वायुसंबन्धी परिमरनामकः कर्मविशेष उक्त इत्यर्थः।

तमेतं कर्मविशेषमुदाहरणमुखेन प्रशंसति—

तमेतं ब्रह्मणः परिमरं मैत्रेयः कौपरवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच तं ह पञ्च राजानः परिमम्रुस्ततः सुत्वा महज्जगाम इति।

उक्तं कर्मविशेषं कुषारवपुत्रो मैत्रेयनामको महर्षिः सुत्वनाम्ने राज्ञे प्रोवाच। कीदृशाय सुत्वने। किरिशस्यापत्यं कैरिशिस्तस्मै कैरिशये। भर्गस्य गोत्रापत्यं भार्गायणस्तस्मै। सुत्वनामकं राजानं परितः सर्वदिक्षु वर्तमानाः पञ्चसंख्याका द्वेषिणो राजानो मम्रुर्मृताः। ततः सुत्वा राजा महत्प्रीष्टं निःसपत्नं पदं जगाम।

उक्तं कर्मविशेषमनुष्ठातुर्व्रतविशेषं विधत्ते—

तस्य व्रतं न द्विषतः पूर्व उपविशेद्यदि तिष्ठन्तं मन्येत तिष्ठेतैव न द्विषतः पूर्वः संविशेद्यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्वप्याद्यदि [illegible] जघन्यायेत्, इति।

तस्यानुष्ठातुरेतद्व्रतमुच्यते। एतदीयो द्विषन्यदोपविशति तदा प्रावस्वयं नोपविशेत्। किंतु [illegible] मुखेन ण तदीयं वृत्तान्तं विजानीयात्। यदि द्विषन्तं तिष्ठन्तं मन्येत [illegible] स्वयमपि तिष्ठेतैव तथा यदा द्विषञ्शयनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करोति ततः प्राक्स्वयं न संविशेत्। शयनं न कुर्यात्। यदि द्विषन्तमुपविष्टं मन्येत तदानीं स्वयमप्युपविशेदेव। तथा द्विषन्यदा निन्द्रां करोति ततः प्राक्स्वयं न प्रस्वप्यात्। किंतु यदि द्विषन्तं जाग्रतं मन्येत तदानीं स्वयमपि जाग्रियादेवेति।

एवं व्रतमाचरतः फलं दर्शयति--

अपि ह यद्यस्याश्ममूर्धा द्विषन्भवति क्षिप्रं हैवैनं स्तुणुते स्तुणुते ॥ २८ ॥ इति।

इत्यष्टमपञ्चिकायां पञ्चमोऽध्यायः ॥ ५ ॥

अस्य राज्ञोऽनुष्ठातुर्द्विषञ्शत्रुर्यद्यश्ममूर्धा पाषाणसदृशशिरस्को भवति। अतिप्रबल इत्यर्थः। तथाऽप्ययं कर्मविशेषः शीघ्रमेवैनं शत्रुं स्तृणुते हिनस्ति। अभ्यासोऽध्यायसमाप्त्यर्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मण-भाष्ये चत्वारिंशाध्याये पञ्चमः खण्डः ॥५॥ (२८) [१८६]।

इति ऐतरेयब्राह्मणभाष्ये चत्वारिंशोऽध्यायः ॥ ४० ॥

इत्यैतरेयब्राह्मणेऽष्टमपञ्चिका समाप्ता ॥ ८ ॥

समाप्तिमगमदिदं सायणाचार्यभाष्यसमेतमैतरेयब्राह्मणम् ॥



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE